**शंस** हिंसायां स्तुतौ कथने च भ्वा० पर० सक० सेट् क्त्वा वेट्। शंसति अशंसीत्। [शप्यति ते अशापसीत्।

**शप** आक्रोशे वा भ्वा०पक्षे दिवा०उभ०सक०अनिट्। शपति ते

**शपथ** पु० शप-अथन्। सत्यताकरणाय दिव्यभेदकरणे यथा एतत् यदि मिथ्या स्यात् तदा मे एतदनिष्टं स्यादित्यादि

**शपन** पु० शप-ल्युट्। १शपथे अमरः। २गालौ त्रिका०।

**शप्त** त्रि० शप-क्त। १अभिशापप्राप्ते २उलपाख्ये तृणभेदे पु० शब्दच०। [च मेदि०।

**शफ** न०शम-अच् पृषो०पस्य फः। १गवादीनां खुरे २वृक्षमूले

**शफर** पुंस्त्री० शफं राति रा-क। (पुँटी) मत्स्यभेदे अमरः स्त्रियां ङीष्।

**शफराधिप** पु० ६त०। इल्लिशमत्स्ये त्रिका०। [शब्दत् त।

**शब्द** शब्दकरणे अ०चु०उभ० सक० सेट्। शब्दयति ते अश-

**शब्द** पु० शब्द-घञ्। १ध्वन्यात्मके २वर्णात्मके च श्रोत्रेन्द्रियग्राह्ये आकाशस्य गुणभेदे।

**शब्दग्रह** पु० शब्दं गृह्णाति ग्रह-अच्। १श्रोत्रेन्द्रिये घञर्थे अप् ६त०। २शब्दज्ञाने।

**शब्दतन्मात्र** न० कर्म०। सांख्यमतसिद्धे आकाशकारणे सूक्ष्मभूतभेदे तन्मात्रशब्दे ३२२८ पृ० दृश्यम्।

**शब्दन** त्रि० शब्द-ल्यु। शब्दकारके अमरः।

**शब्दब्रह्मन्** न०शब्दात्मकं ब्रह्म। १वेदात्मके २स्फोटात्मके च नित्ये शब्दरूपे ब्रह्मणि। [१बाणभेदे २अर्जुने त्रिका०।

**शब्दभेदिन्** पु०शब्दानुसारेण भिनत्ति लक्ष्यम् भिद-णिनि।

**शब्दवेधिन्** पु० शब्दानुसारेण विध्यति लक्ष्यं विध-णिनि। १बाणभेदे २अर्जुने च धनञ्जयः।

**शब्दशक्ति** स्त्री ६त०। शब्दानामर्थावबोधकतारूपे अभिधालक्षणादौ वृत्तिरूपे सामर्थ्ये।

**शब्दाधिष्ठान** न० ६त०। कर्णे हेमच०।

**शब्दानुशासन** न० अनुशिष्यतेऽनेन अनु+शास-ल्युट् ६त०। शब्दसाधुताज्ञापके व्याकरणे। "अथ शब्दानुशासनम्" महाभाष्यम्।

**शब्दालङ्कार** पु० शब्दमात्रकृतोऽलङ्कारः। अलङ्कारशास्त्रप्रसिद्धेऽनुप्रासादौ अलङ्कारे। अलङ्कारशब्दे तद्भेदादिकं दृश्यम्।

**शब्दित** त्रि० शब्द-क्त। आहूते।

**शम** शान्तौ अक० शान्तीकरणे सक० दि० शमा० पर० सेट्। शाम्यति इरित् अशमत्-अशमीत्। उदित् क्त्वा वेट्। शान्तः। शमयति शामयति।

**शम** आलोचने चु० उभ० सक० सेट्। शामयति ते शमयति ते अशीशमत् त।

**शम** पु० शम-घञ्। १शान्तौ अन्तरिन्द्रियदमने अमरः। २मोक्षे त्रिका० ३पाणौ रामाश्रमः। ४उपचारे राजनि०।

**शमथ** पु० शम-अथच्। १शान्तौ अमरः। २मन्त्रिणि मेदि०।

**शमन** पु० शमयति शम-णिच्-ल्यु। लोकानां पुण्यापुण्यफलदातृत्वेन दण्डकारके १यमे अमरः। शम-णिच्-भावे ल्युट्। २शान्तीकरणे न०। ३यज्ञार्थपशुघाते अमरः ४चर्वणे धरणिः ५हिंसायां हेमच० ६मृगभेदे शब्दच०।

**शमनस्वसृ** स्त्री ६त०। यमुनायाम् अमरः।

**शमल** न०शम-कलच्। १विष्ठायाम् अमरः। २पापे संक्षिप्त०

**शमि(मी)** स्त्री शम-इन् वा ङीप्। (शाइ) १वृक्षभेदे "शमी तिक्ता कटुः शीता कषाया रेचनी लघुः। कफकासभ्रमश्वासकुष्ठार्शःकृमिजित् स्मृता" भावप्र०। २शिम्बायाम् (शुँटि) हेमच०। ३बाकुचां मेदि०।

**शमिन्** त्रि० शाम्यति शम-घिनुण्। शान्ते।

**शमीक** पु०शम-बा० ईक। मुनिभेदे। [२विप्रे च शब्दच०।

**शमीगर्भ** पु० शमीगर्भं आधारत्वेनास्त्यस्य अच्। १वह्नौ

**शमीधान्य** न० शमी शिम्बेव धान्यम्। शिम्बात्मके माषमुद्गादौ धान्ये अमरः।

"शमीजाः शिम्बिजाः शिम्बा तराः सूप्याश्च वैदलाः। वैदलामधुरा रूक्षाः कषायाः कटुपाकिनः। वातलाः कफपित्तघ्ना बद्धमूत्रमला हिमाः। ऋते मुद्गमसूराभ्यामन्ये त्वाध्मानकारकाः"। मुद्गमसूरयोरनाध्मानकारित्वमन्यवैदलापेक्षया न तु सर्वथा एतयोरपि किञ्चिदाध्मानकारित्वदर्शनात्" भावप्र० "शूकधान्यं शमीधान्यं समातीतं प्रशस्यते। परतो वातकृद्रूक्षं प्रायेणाभिनवं गुरु। यवगोधूममाषाश्च तिलाश्चाभिनवा हिताः। पुराणा विरसा रूक्षा न तथार्थकरा मताः" राजवल्लभः।

**शमीपत्री** स्त्री शम्या इव पत्त्रमस्याः ङीप्। लज्जालुलतायां जटा०।

**शमीर** पु० अल्पा शमी अल्पार्थे र "क्वचित् स्वार्थिका अपि प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते" इति भाष्योक्तेः पुंस्त्वम्। क्षुद्रायां शम्याम् अमरः।

**शम्पा** स्त्री शं पाति पा-क। विद्युति अमरः।

**शम्पाक** पु०शं शिवं पाके फले वा यस्य। १आरग्वधे अमरः। २विपाके ३यावके च हेमच०।

**शम्ब** गतौ भ्वा० पर० सक० सेट्। शम्बति अशम्बीत्।